# ॥ श्रीरुद्रमृत्युञ्जयस्तवनम् ॥

.. Shri Rudra Mrityunjaya Stavana ..

sanskritdocuments.org

July 26, 2016

# Document Information

Text title : rudramRityunjayastavanaM
File name : rudramRityunjayastavana.itx
Location : doc_shiva
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com, NA
Source : Rudrayamale uttaratantre mahAtantroddIpane
Latest update : July 26, 2016
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ श्रीरुद्रमृत्युञ्जयस्तवनम् ॥

श्रीआनन्दभैरव उवाच -
श्रुतं च साधनं पुण्यं महारुद्रस्य सुन्दरि ।
मणिपूरे प्रकाशश्च कथितं ज्ञाननिर्णयम् ॥ १॥

अकस्मात् सिद्धिसम्पत्तिं नुतिं वद महाप्रियाम् ।
यस्य श्रवणमात्रेण पाठेन योगिनीवशम् ॥ २॥

श्रीआनन्दभैरवी उवाच -
परमानन्ददेवेश योगानामधिप प्रभो ।
स्तोत्रं रुद्रस्य वक्ष्यामि सारात्सारं परात्परम् ॥ ३॥

यज्ज्ञात्वा योगिनः सर्वे षट्चक्रपरिभेदकाः ।
आकाशगामिनः सर्वे स्वर्गमोक्षाभिलाषुकाः ॥ ४॥

महादेवसमाः सर्वे देवाश्च स्वर्गभोगिनः ।
सर्वरक्षाकरं स्तोत्रं ये पठन्ति निरन्तरम् ॥ ५॥

ते यान्ति ब्रह्मसदनं सिद्धमुख्या महीतले ॥ ६॥

ॐ भजामि शम्भुं सुखमोक्षहेतुं रुद्रं महाशक्तिसमाकुलाङ्गम् ।
रौद्रात्मकं चारुहिमांशुशेखरं कालं गणेशं सुमुखाय शङ्करम् ॥ ७॥

var रौद्रार्थकं रुद्रहिमांशुशेखरं कालं कुलेशं शिवशङ्करञ्चेति

मृत्युञ्जयं जीवनरक्षकं परं शिवं परब्रह्मशरीरमङ्गलम् ।
हिमांशुकोटिच्छविमादधानं भजामि पद्मद्वयमध्यसंस्थितम् ॥ ८॥

सर्वात्मकं कामविनाशमूलं तं चन्द्रचूडं मणिपूरवासिनम् । सर्वार्थकम्
चतुर्भुजं ज्ञानसमुद्रयाढ्यं पाशं मृगाक्षं गुणसूत्रव्याप्तम् ॥ ९॥

धरामयं तेजसमिन्दुकोटिं वायुं जलेशं गगनात्मकं परम् ।
भजामि रुद्रं कुललाकिनीगतं सर्वाङ्गयोगं जयदं सुरेश्वरम् ॥ १०॥

शुक्रं महाभीमनयं पुराणं (महाभीमलयं)
प्राणात्मकं व्याधिविनाशमूलम् ।
यज्ञात्मकं कामनिवारणं गुरुं (यज्ञार्थकम्)
भजामि विश्वेश्वरशङ्करं शिवम् ॥ ११॥

वेदागमानामतिमूलदेशं तदुद्भवं भद्रहितं परापरम् । तद्रहितं
कालान्तकं ब्रह्मसनातनप्रियं भजामि शम्भुं गगनादिरूढम् ॥ १२॥

शिवागमं शब्दमयं विभाकरं भास्वत्प्रचण्डानलविग्रहं ग्रहम् ।

ग्रहस्थितं ज्ञानकरं करालं भजामि शम्भुं प्रकृतीश्वरं हरम् ॥ १३॥

छायाकरं योगकरं सुखेन्द्रं मत्तं महामत्तकुलोत्सवाढयम् ।
योगेश्वरं योगकलानिधिं विधिं विधानवक्तारमहं भजामि ॥ १४॥

हेमाचलालङ्कृतशुद्धवेशं वराभयादाननिदानमूलम् ।
भजामि कान्तं वनमालशोभितं चामूलपद्मामलमालिनं कुलम् ॥ १५॥

स्वयं पुराणं पुरुषेश्वरं गुरुं मिथ्याभयाह्लादविभाविनं भजे ।
भावप्रियं प्रेमकलाधरं शिवं गिरीश्वरं चारुपदारविन्दम् ॥ १६॥

ध्यानप्रियं ज्ञानगभीरयोगं भाग्यास्पदं भाग्यसमं सुलक्षणम् ।
शूलायुधं शूलविभूषिताङ्गं श्रीशङ्करं मोक्षफलक्रियं भजे ॥ १७॥

नमो नमो रुद्रगणेभ्य एवं मृत्युञ्जयेभ्यः कुलचञ्चलेभ्यः ।
शक्तिप्रियेभ्यो विजयादिभूतये शिवाय धन्याय नमो नमस्ते ॥ १८॥

बाह्यं त्रिशूलं वरसूक्ष्मभावं विशालनेत्रं तनुमध्यगामिनम् ।
महाविपद्दुःखविनाशबीजं प्रज्ञादयाकान्तिकरं भजामि ॥ १९॥

var महाविपद्भस्मविलासबीजं शुद्धोदयं शान्तिकरं भजामि
पुरान्तकं पूर्णशरीरिणं गुरुं स्मरारिमाद्यं निजतर्कमार्गम् ।
अनादिदेवं दिवि दोषघातिनं भजामि पञ्चाक्षरपुण्यसाधनम् ॥ २०॥

दिगम्बरं पद्ममुखं करस्थं स्थितिक्रियायोगनियोजनं भवम् ।
भावात्मकं भद्रशरीरिणं शिवं भजामि पञ्चाननमर्कवर्णम् ॥ २१॥

मायामयं पङ्कजदामकोमलं दिग्व्यापिनं दण्डधरं हरेश्वरम् ।
त्रिपक्षकं त्र्यक्षरबीजभावं त्रिपद्ममूलं त्रिगुणं भजामि ॥ २२॥

विद्याधरं वेदविधानकार्यं कायागतं नीतनिनादतोषम् ।
नित्यं चतुर्वर्गफलादिमूलं वेदादिसूत्रं प्रणमामि योगम् ॥ २३॥

वेदान्तवेद्यं कुलशास्त्रविज्ञं क्रियामयं योगस्वधर्मदानम् ।
भक्तेश्वरं भक्तिपरायणं वरं भक्तं महाबुद्धिकरं भजाम्यहम् ॥ २४॥

गतागतं गम्यमगम्यभावं समुल्लसत्कोटिकलावतंसम् ।
भावात्मकं भावमयं सुखासुखं भजामि भर्गं प्रथमारुणप्रभम् ॥ २५॥

बिन्दुस्वरूपं परिवादवादिनं मध्याह्नसूर्यायुतसन्निभं नवम् ।
विभूतिदानं निजदानदानं दानात्मकं तं प्रणमामि देवम् ॥ २६॥

कुम्भापहं शत्रुनिकुम्भघातिनं दैत्यारिमीशं कुलकामिनीशम् ।
प्रीत्यान्वितं चिन्त्यमचिन्त्यभावं प्रभाकराह्लादमहं भजामि ॥ २७॥

त्रिमूर्तिमूलाय जयाय शम्भवे हिताय लोकस्य वपुर्धराय ।
नमो भयाच्छिन्नविघातिने पते नमो नमो विश्वशरीरधारिणे ॥ २८॥

var भवाच्छन्ननिघातिने ते
तपःफलाय प्रकृतिग्रहाय गुणात्मने सिद्धिकराय योगिने ।
नमः प्रसिद्धाय दयातुराय वाञ्छाफलोत्साहविवर्धनाय ते ॥ २९॥

शिवममरमहान्तं पूर्णयोगाश्रयन्तं var शिववरहस्तं पुष्पयोगाश्रयन्तम्
धरणिधरकराब्जैर्वर्धमानं त्रिसर्गम् ।
विसममरणघातं मृत्युपूज्यं जनेशं var विसमचरणघातं मृत्युधातं नरेशं
विधिगणपतिसेव्यं पूजये भावयामि ॥ ३०॥

एतत्स्तोत्रं पठेद्विद्वान् मुनिर्योगपरायणः ।
नित्यं जगन्नाथगुरुं भावयित्वा पुनः पुनः ॥ ३१॥

मणिपूरे वायुनिष्ठो नित्यं स्तोत्रं पठेद् यदि ।
जीवन्मुक्तश्च देहान्ते परं निर्वाणमाप्नुयात् ॥ ३२॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने
रुद्रमृत्युञ्जयस्तवनं नामाष्टचत्वारिंशतमः पटलः ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com, NA

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. Shri Rudra Mrityunjaya Stavana ..
was typeset on July 26, 2016

Please send corrections to *sanskrit@cheerful.com*